# संस्कृत-वार्ता:

दिनाङ्कः- 22.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- गृहमन्त्रालयस्य उच्चाधिकार-प्राप्त-समितेः लद्दाखस्य नेतृणां च मध्ये विविध-प्रकणेषु नव-दिल्ल्याम् औपचारिकः संवादः अभवत् । संवादे लेह् एपेक्स बॉडी अथ कारगिल डेमोक्रेटिक अलायंस इत्येतयो: सदस्या: आसन्।
- भारतेन जगतः सम्पूर्ण-वन-क्षेत्रे नवमी स्थानं प्राप्य वैश्विक-पर्यावरण-संरक्षणे महत्त्वपूर्णोपलब्धिः अधिगता। वार्षिक-वन-क्षेत्र-वृद्धौ भारतस्य तृतीयं स्थानं यथावत् वर्तते।
- देशस्य नवीकरणीयर्जा क्षमतायाम् विगतेषु एकादश वर्षेषु उल्लेखनीया वृद्धिः जाता।
- ऋतुविभागेन अद्य तमिलनाडु-पुद्दुचेरी उत्तरान्ध्रप्रदेशेषु वृष्टेः अनुमानं प्रकटितम्।

-----------------------------------------

**गृहमन्त्रालयः**

गृहमन्त्रालयस्य उच्चाधिकार-प्राप्त-समितेः लद्दाखस्य नेतृणां च मध्ये विविध-प्रकणेषु नव-दिल्ल्यां वार्ता अभवत् । विगते मासे केन्द्रशासित-प्रदेशे दुरापादितायाः हिंसायाः अनन्तरं प्रमुखविषयेषु अयं प्रथमः औपचारिकः संवादः वर्तते। उच्चाधिकार-प्राप्त-समितेः माध्यमेन लेह् एपेक्स बॉडी अथ कारगिल डेमोक्रेटिक अलायंस इत्यनयोः मध्ये वार्ता जाता। उपवेशनस्य अनन्तरं कारगिल डेमोक्रेटिक अलायंस इत्यस्य नेता सज्जाद हुसैन करगिल: अवोचत् यत् अस्माकम् अध्यर्थना लद्दाखाय पूर्णराज्यस्य स्तर प्रदानम् एव वर्तते। असौ अवदत् यत् एकस्मिन् द्वयो: च उपवेशनयो: माध्यमेन एतत् न सम्भवति।

-----------------------------------------

## भारतस्य वनक्षेत्रम्

भारतेन जगतः सम्पूर्ण-वन-क्षेत्रे नवमी स्थानं प्राप्य वैश्विक-पर्यावरण-संरक्षणे महत्त्वपूर्णोपलब्धिः अधिगता। इण्डोनेशियायाः बाली नगरे खाद्य-कृषि-सङ्घटनेन प्रख्यपिते ऐषमो वैश्विक-वन-संसाधन-आकलने विवरणं प्रदत्तम्। पर्यावरणमन्त्री भूपेन्द्रयादवः अवोचत् यत् दशम-स्थानात् नवम-स्थान-प्राप्तिः बृहदुपलब्धिः वर्तते । इयं प्रगतिः वन-संरक्षण-वन्यीकरण-सामुदायिक-प्रयासैः पर्यावरण-संरक्षणस्य दिशि सर्वकारस्य नीतिनां कार्यक्रमाणां च साफल्यं द्योतयति। श्रीयादवेन उक्तं यत् वार्षिक-वन-क्षेत्र-वृद्धौ विश्वे भारतस्य तृतीयं स्थानं यथावत् वर्तते। तेनोक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः पदक्षेपेन - 'एक पेड मां के नाम' इत्यनेन सम्पूर्णदेशाय वृक्षारोपणस्य प्रेरणा प्राप्ता।

---

## नवीकरणीयोर्जा

देशस्य नवीकरणीयर्जा क्षमतायाम् उल्लेखनीया वृद्धिः सञ्जाता। इयं वृद्धि चतुर्दशोत्तर-द्विसहस्र-तमवर्षस्य तुलनायां पञ्च-गुणाधिका वर्तते। जलविद्युत प्रतिष्ठानैः उत्पादिता विद्युत् अतः पृथक् अस्ति, नूतननवीकरणी योजो मन्त्रालयेन उक्तं यत् प्रशासनेन त्रिंशदुत्तर द्विसहस्रतम वर्षं यावत् पञ्चशतं गीगावॉट इति परिमितं जैवाश्वमोर्जायाः महत्त्वाकांक्षी लक्ष्यं निर्धातिम् मन्त्रालयेन उक्तं यत् भारतस्य नवीकरणीययोजो वृद्धिः गतिः जगत सर्वाधिका वर्तते।

---

## राष्ट्रपतिः सबरीमला

राष्ट्रपति: द्रौपदी मुर्मु: अद्य केरलस्य सबरीमला मंदिरे पूजा-अर्चनां कृतवती। केरलस्य चतुर्दिवसीय यात्रावधौ राष्ट्रपति: तिरुवनंतपुरमत: पथनमथिट्टा गतवती। सा राजमार्गेण पर्वतीय मंदिरे आधारस्थलं पंपां प्रति प्रस्थिता।

------------------------------------------

## बिहार-विधानसभा

बिहार-विधानसभा-निर्वाचने शासिदलं विपक्षी दलानि च मतदातृन् आकर्षितुं अनेकानि वचनानि यच्छन्ति। राष्ट्रीय-जनता-दलस्य नेता तेजस्वी प्रसाद यादव: उक्तवान् यत् यदा महासंयुति: सन्तायाम् आगमिष्यति तदा सर्वाभ्य: स्वयं सहायता समूह सम्बद्धाभ्य: महिलाभ्य: प्रतिमासं त्रिंशत्सहस्ररुप्यकाणां वेतनं स्वास्थ्यागोप: अन्यलाभाश्च प्रदास्यन्ते।

भाजपादलस्य नेता नित्यानन्दराय: तेजस्वी यादवस्य जीविका दीदी विषयकां घोषणां वञ्चना अवोचत्। तेनोक्तं यत् इयं घोषण जनेषु भ्रामकतां जनयति। अपरत्र भाजपादलेन उक्तं यत् यदि एन.डी.ए. संयुति प्रशासने आगमिष्यति चेत् राज्यं तीव्रगत्या विकासं प्राप्स्यति। भाजपादलस्य बिहार प्रदेशाध्यक्ष: दिलीप जयसवाल: विश्वासं प्रकटितवान् यत् बिहारस्य जना: पुनरेकदा एन.डी.ए. संयुतौ बहुमतं प्रदास्यन्ति।

------------------------------------------

## नौसेना

नौसेनायाः अधिकारिणाम् अर्धवार्षिकं सम्मेलनं नवदिल्ल्याम् आरब्धम्। ऑपरेशन सिंदूर अभियानस्य अनन्तरं नौसेनायाः नूतनाभियानान् सनद्धतां च निध्याय इदं सम्मेलनं महत्त्वपूर्णं विद्यते। इदं सम्मेलनं राष्ट्रिय-नेतृत्वस्य प्रशासनिकाधिकारिणां च मध्ये सम्पर्क-संवादयोः प्रभाविमञ्चः वर्तते। अथ च वर्तमान भू-रणनीतिक- परिदृश्ये बहुविध-समाह्वानानां निराकरणे नौसेनायाः क्षमतायाः समीक्षां करोति।

रक्षामन्त्री राजनाथ-सिंहः श्वः नौसेनाधिकारिणः सम्बोधयिष्यति सप्तचत्वारिंशदुत्तर-द्विसहस्रतमाब्दस्य विकसित-भारतस्य रूपरेखां प्रस्तौस्यति। प्रमुखाधिकारिभिः सह नौसेनाप्रमुखः भारतीयसमुद्र-क्षेत्रे सुरक्षास्थितेः सम्बद्ध-योजनानां समीक्षां करिष्यति।

------------------------------------------

## सूचनाप्रसारणमंत्रालयविशेषाभियानम्

सूचना-प्रसारण मंत्रालयेन विशेषाभियानस्य अंतर्गतं त्रिनवतिउत्तरचतु:शतं अभियानानां माध्यमेन त्रिसप्ततिउत्तरनवशतं स्थानानां चतुरधिकैकशतं वाहनानां च स्वच्छता कृता। मंत्रालयेन उक्तं यत् अभियानस्य अंतर्गतं आहत्य सार्धैक लक्ष किलोग्राम परिमितं अवकरं विनष्टं कृतम्। येन मंन्त्रालयेन चतुत्रिंशदधिक लक्षरुप्यकाणां राजस्वं प्राप्तम्। अभियानस्य अंतर्गतं एकोत्तरत्रिशतं जनानां समस्या-प्रतिवेदनानि दूरीकृतानि।

------------------------------------------

## कृषि:एआई

प्रधान-वैज्ञानिक-परामर्शदेन प्रो. अजय कुमार सूदेन देशे उत्तदायी एआई इति कृत्रिम बुद्धिमत्ता स्वीकर्तुं 'कृषि लघु मध्यमोद्यमेभ्य: एआई प्लेबुक' अथ 'एआई सैंडबॉक्स श्वेत पत्रं' प्रसारितम्। एते भारतस्य महत्वपूर्ण क्षेत्रेषु कृत्रिम बुद्धिमत्ता समाधानं प्रवर्तितुं व्यावहारिकतां यच्छन्ति। एतत् व्यापक-क्षेत्रीय- परामर्शे विशेष-परियोजनासु अन्येषु च विषयेषु प्राप्त परामर्शाधारितं वर्तते।

------------------------------------------

## युगाण्डा

युगाण्डा-देशे कंपाला-गुलु-राजमार्गे अद्य एकस्यां बहु-वाहन-दुर्घटनायां त्रिषष्टि: जजना मृता:। युगांडाया आरक्षि बलानुसारेण बसयान द्वयस्य पररस्पर-संघट्टनेन एका शृंखलाबद्ध-प्रतिक्रिया उत्पन्ना। यया अनेकानि वाहनानि ध्वंसितानि।

------------------------------------------

## ऋतु विज्ञान

क्षेत्रीय-ऋतुविभागेन दक्षिण-पश्चिम-बङ्गाल-खात्याम् उत्पन्नं निम्नापीडक्षेत्रम् गहनापीडे परिवर्तितुं शक्यते। तमिलनाडु-पुद्दुचेरी उत्तरान्ध्रप्रदेशेषु वृष्टेः अनुमानं वर्तते। तीव्रवर्षाकारणेन तमिलनाडोः चेन्नई, चेंगलपत्तो, कांचीपुरम जनपदेषु विद्यालयेषुअवकाश: घोषित: । अस्माभि: वरिष्ठवैज्ञानिकेन आर.के. जेनामणिना सह ऋतो: वर्तमानस्थिति-विषये संवाद: कृत:।

------------------------------------------

## नीरजः चोपड़ा

कुन्तक-क्षेपकाय क्रीडकाय नीरज चोपड़ा इत्यस्मै भारतीय-सेनायां लेफ्टिनेंट कर्नल इति मानदोपाधिः प्रदत्तः। अद्य नवदिल्ल्यां रक्षामन्त्रिणः राजनाथ-सिंहस्य सेना प्रमुखस्य जनरल उपेंद्र द्विवेदिनः च उपस्थितौ अयं समारोहः आयोजितः। नीरज चोपड़ा वर्यस्य गणवेशे तदीय नूतनपदस्य प्रतीकचिन्हं संस्थाप्य असौ आधिकारिकरूपेण पदोन्नतिं प्राप्तवान्। अवधेयं यत् नीरज चोपडा द्विवारम् ओलम्पिकपदकं विजितवान्।

------------------------------------------

## क्रिकेट्

आईसीसी-महिला-एकदिवसीय-विश्व-चषक-प्रतिस्पर्धायाम्  अद्य ऑस्ट्रेलिया  इंग्लैंड  दलयोः मध्ये स्पर्धा प्रचलति। आदौ पणकं विजित्य ऑस्ट्रेलिया-दलेन कन्दुक-क्षेपणस्य निर्णयः कृतः। अन्तिमवार्ताः लेखन-समयं यावत् इंग्लैंड-दलेन ..... क्षेपचक्रेषु ......... क्रीडिकाणां हानौ ..... धावनाङ्कः अधिगताः।

॥ इति वार्ताः ॥